Shri Raghunatha Temple MSS. Library,
JAMMU

No. ६७६ · घ

Title मनीषापञ्चकम् मधुमंजरीटीका सहितम्

Author बालगोपालेन्द्रः

Extent ५ Age

Subject वेदान्तशास्त्रम् · सम्पूर्णम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ६८६-च

(वेदान्तशास्त्रम्) मनीषापञ्चकम् मधुमंजरीनाम्नीटीकासहितम्

पत्राणि ५ (~~[illegible]~~) (सम्पूर्णम्)

५ पत्र

नं० ५७६-च

लिपिक: बालगोपालेन्द्र:

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० १६५८

मनीषापंचकटीका मधुमञ्जरी

५ पत्राणि

पूर्ण

कर्ता — आनन्दगिरि:

मनीषापंचक

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

श्रा

ॐ श्रीगणेशाय नमः श्रीमन्मंगलमूर्तये नमः श्रीमद्यतीन्द्रमानम्य जगभाष्यप्रवृत्तिगुरुम् मनीषापंचकव्याख्यानमा
तेमधुमञ्जरी १ तत्रादौ कथा निरूप्यते कदाचि[त्] [शं]कराचार्यः काशीं प्रतिपुरीयतो तस्यज्ञानपरीक्षार्थं कश्चि^
१ द्देवः समागतः २ चाण्डालरूपी तं दृष्ट्वा गच्छ गच्छेति चाब्रवीत् तथोक्तवंतमाचार्यं स देवः पुनरब्रवीत् ३ तथा
हि अन्नमयेति अस्यायमर्थः अद्यते पञ्चेन्द्रियैस्तदन्नं अ[त्ति] भूतानि च भक्षणानि यत्तदन्नं अद भक्षणे इति धातोरस्य शाह द
मु स्यात्त्वन्नवानन्नं अद्यतेत्ति च भूतानि तस्मादन्नं तदुच्यत इति श्रुतेः अन्नं तदन्नमयस्तत्प्रधानस्तद्विकारो वा स्थूलदे
हो न्नमयः स उच्यते तस्मादन्नमयात् चाण्डालतज्जातिविशिष्टाद्विप्रत्वजातिविशिष्टात् अन्नमयमुक्तलवराणं म
स्थूलदेहं हमन्यतरजातिविशिष्टं दूरीकर्तुं दूरतः परिहर्तुं गंतुं हे द्विजवर २ जन्मना जायते शूद्रः कर्मणा

अन्नमयादन्नमयमथवा चैतन्यमेव चैतन्यान् द्विजवर दूरीकर्तुं वांछसि किं ब्रूहि गच्छ गच्छेति

२ क

जायते द्विजः वेदाध्यायी भवेद्विप्रो ब्रह्म जानाति ब्राह्मणः इति स्मरणात् द्विजानां द्विजत्वानां कर्मिणां
४२ वरः मध्ये श्रेष्ठः अंत्यतकर्मनिरतस्य गच्छ गच्छेति वचसा वासि अभिलषसि मनः पूर्वकत्वाद्वाग्व्यापारस्य य^
द्धि मनसा ध्यायति तद्वाचा वदति वाग्वै मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमित्यादि श्रुतिभ्यो वाग्व्या
पारस्य मनोव्यापारपूर्वकत्वं सिद्धं तदुक्तं भाष्यकृता श्रीविष्णुसहस्रनामभाष्ये मनसा वाचि [..] से क^
त्पयत्यथवा वाच्याह इति मनसा ध्यायति तद्वाचा वदतीति श्रुतिभ्यां स्मरणं ध्यानं च नामकीर्तनं एवा
न्नमयमिति किं ब्रूहीति काकुस्वरेण आक्षेपः कृतः पक्षांतरमवलंब्य तत्पक्षे वेति अथवा उत चैतन्यमेव १
चैतन्यान्न भिन्नं अमूर्तत्वधर्मैः चैतन्यमेव २ ॥ ॥ ॥ ॥चैतन्यमेव॥ ॥
चैतना× चैतन्यं किंत्व

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

प्र

दे नन स्यादिति तेन व्यक्तिभेदस्यानंगीकारेणाजातेरनंगीकारात् तच्चेतसंकटस्थरूपं प्रतिबिंबरूपमवच्छिन्नरू
पमेव नान्यत् तादृशा दर्वं चेतन्यादृशो मोभयजानीयो विशिष्टमस्थलेट हा तर्वति ना दूरीकर्तुं वाञ्छसि किंत्वहिंग
च्छगळेन पूर्वं वदन् उच्यते २ एवं द्वेधा विकल्प्य द्वितीयविकल्पमादौ परिहरन् प्रतिबिंबावच्छिन्नचैतन्याभ्यां
तयोश्चैतन्ययोर्दूरीकरणं कानयुज्यत इति क्रमेण सदृष्टान्तमाह किंगंगांबुनि ब्राह्मणावर्तदेशे का पुण्यादिगुण
नगरग्रामे देवता मनोहारिणी विस्तृतपदोदकवाभागीरथ्यो जाह्नवी प्रवाहपर्यायनाम्नी विलसति गगनतस्थाः स
र्वे पापहन्ययकरे पंकरहिता मातृप्रायके चयरे तु जले तस्मिन्नंबरमणो ग्रंबरे तन्नभसि मणिर्मणिवद्दीप्यत इति प्रतिशा
येन विराजमानत्वादंबरमणिः सूर्यः तस्मिन् विंविते प्रतिबिंबिते सति प्रतिच्छाययादृश्यमाने सतीति यावत्
तथैव चांडालवाटीपयः पूरे चांडालाः श्वपचास्तेषां वाटी वीथी तत्संबंधि पयः पूरे च मे च्छेदनादिना दुर्गंधदु
ष्टे लिंगजले तस्मिन् विबिंबिते सतीत्यनुषज्यते अंतरभेदो ऽस्ति विद्यते किमित्याक्षेपः उभयत्रापि योज्यः नात

किं गंगांबुनि बिंबितेऽबरमणौ चांडालवाटीपयः पूरे वांतरमस्ति कांचनघटीमृत्कुंभयो
र्वांबरे २

रमनुभयेन विद्वद्विद्वत्सामान्येनेत्यादेश्चाभिप्रायः एवं प्रतिबिंबपक्षांगीकारे भेदभ्रमस्यानवकाशं प्र
दर्श्यावच्छिन्नपक्षेपि तं दर्शयति कांचनेति कांचनेन स्वर्णेन निर्मिता घटी कुंभः कांचनकुंभः कां
स्त्रि चनघटी मृदा प्रसिद्धया धात्वादिगुणवत्या निर्मितः कुंभो मृत्कुंभस्तयोरंताभ्यामवच्छिन्नमाकाशे तमेव
रेन भोयत नभसि तन्नमलिकिमित्याक्षेपः नास्त्येवेति तात्पर्यं अत्रोभयपक्षयोः प्रतिबिंबयोरवच्छि
न्नयोर्वा बिंबेनाऽनवच्छिन्नेन प्रतिबिंबाभ्यामवच्छिन्नाभ्यां वा बिंबस्यानवच्छिन्नस्य प्रतिबिंबयोरव
च्छिन्नयोर्वा परस्परं न कदाचिद्भेदगंधस्यावकाशः व्यवहारभेदस्योपाधिपरामर्शमंतरेणाऽविभाव
मनत्वात विचारः भावनस्यैतमिर्यभ्रमस्याविचारवद्भिर्नैवस्तुत्वमवसीयते किं तु विकल्पैरेवेत्यतो वि
चारवता भवता कथ मुच्यते गच्छगळेनेत्यभिप्रायः ॥ ॥ ॥ ॥ राम
ग गौ वे

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अनुपाधिकेन तेन स्य न

संप्रति दृष्टांतेनसोपाधिकयोरन्योन्यमनुपाधिकेनतेनाभ्यांतस्य च भेदाभावेप्युपाधिभूतयोर्भावशक्तीरिव
२ एण उएण देवयोरन्य च तत्स्य गंगादि उपाधु उएण जलयोर्भेदस्यविद्यमानत्वात्तदृष्टांतकोपिविप्रत्वा
विप्रत्वजातिविशिष्टयोः स्थूलदेहयोस्तत्संस्कारतदभावविशिष्टयोरंतःकरणयोश्चभेदस्यानुभू
तत्वात् विप्रत्वजातिविशिष्टतत्संस्कारोपेतदेहतदंतर्वर्त्यंतःकरणाभ्यांतज्जातिरहिततत्संस्कारशून्य
देहतदंतर्वर्त्यंतःकरणयोरद्वैतीकरणोक्तायुक्तैवेति वदता शंकितस्य पुनरप्यध्यस्तप्रपंचविधुरेणपरमा
त्मनि विततेन किंचिदस्य द्वितयमिति यत्तत्वमस्य सर्वमात्मैवाभूत्केन कं पश्येदित्यादि श्रुतिमनुस्म
त्य सर्वात्मकत्मात्मनोऽनुभवन्नुपाधिरहितानि तद्द्वैतीकरणोक्तानवदिष्यत इति प्रथमं विकल्पं परिहर
ति प्रत्यग्वस्तुनीति प्रातिलोम्येन मिथ्याध्यस्तसर्वप्रपंचवैलक्षण्येन अंचति प्रकाशत इति प्रत्यक् परमा त

प्रत्यग्वस्तुनि निस्तरंगसहजानंदावबोधांबुधौ विप्रोयं श्वपचोयमित्यपि महान्कोयं विभेद
भ्रमः २

त्मा स च वस्तु अनध्यस्तात्मस्वभावत्वे सति कल्पितसमस्तवस्त्वधिष्ठानभूतं तस्मिन् प्रत्यग्वस्तुनि किंचनि
गीतप्रपंचरूपस्तरंगोप स्मात् सहजानंदावबोधांबुधेः सहजः स्वभावः आनंदस्तत्त्वअवबोधः स्फुरणात्स्व
भावभूतो न केनापि निर्वर्तनं आनंदश्चासावबोधश्चेति सहजानंदावबोधः स एवांबुधिरपर्यंतत्वात्तस्मिन्निति
स्तरंगसहजानंदावबोधांबुधौ प्रत्यग्वस्तुन्यहमित्यनुभूयमानेसतीति विशेषः विप्रोयं द्विजाति रध्ययनशी
लः श्वपचोयं चंडालः पश्चात कर्मतिचरयता परिच्छेदस्यन्योयं विविधभ्रमजेत भ्रांतिः कः कुत्र स भ्रांतिन त्रयं त्र्यात्मा
कुतोपीत्यर्थः प्रत्यगेकरसस्य वस्तुनो निष्प्रपंचोक्तेरितिभावः २ एवं केवलपारमार्थिकदृष्टिमवलंब्या २
द्वितः सत्वाचार्या यं देवं लोके परेष्टा पूर्णपुरुषो विश्वेश्वराभ

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वितमर्हतीति तन्निश्चित्य तथा प्रोक्तमेवमेतत्प्रमाता दृष्टा दृष्टिर्मन्तृभवाहंशेषु नास्माकं चण्डालत्वादिप्रतीतिरित्य
भिप्रेत्य जाग्रदित्यादिभिः पंचभिः श्लोकैः स्वानुभवसिद्धं रूपयति तत्र तावच्चतुर्षु वेदेषु श्रूयाणि प्रसिद्धानि प्रज्ञानं ब्र
ह्म अहं ब्रह्मास्मि तत्त्वमसि अयमात्मा ब्रह्मेति तेषु रूपाणि क्रमेण ऋग्यजुःसामाथर्वणोपनिषद्गतानि महावाक्या
न्यर्थैर्लोकः नु क्रमति जाग्रदित्यादिना अस्यायमर्थः यस्यापि कस्यचित्पुरुषविशेषस्य दृढप्रत्ययास्ति चितसद्रूपस्व
श्वेडालोऽस्तु द्विजोवास्तु गुरुरित्येषा मम मनीषेत्यन्वयः अत्रासैवाहं न च दृश्यावस्तिति प्रतीतिरयाः प्रकाश्यतेः
स्फुटतरेति संविदः सर्वप्रसिद्धिद्योतनार्थं जानामीत्यादि संव्यवहारेषु प्रतीतस्य विज्ञमाणत्वात् प्रतीतानाम्
भवविहीनस्य लोकस्य वक्तुमसमाकृतेः आत्मा च विचारैरनाथ कोऽस्माभिर्वास्फुटतरेति संविदोऽनाहतत्वमु
च्यते तस्याः संवीथिष्ठानत्वात्सर्वप्रकाशकत्वेनावस्थानत्वात्स्यापि भासकत्वात्तमेव भान्तमनुभाति सर्वमि
त्यत्र श्रुतौ सर्वग्राह्येनावस्थानस्यापि विवक्षितत्वात् चैतन्यप्रसिद्धिद्योतनेनतुषच्छेद्येन भवतीति नन्वयच्छेद्येन चै

जाग्रत्स्वप्नसुषुप्तिषु स्फुटतरा या संविदुज्जृम्भते या ब्रह्मादिपिपीलिकान्ततनुषु प्रोता जग
त्साक्षिणी

तन्यस्य प्रसिद्धिर्विवक्षिता चेत्तर्हि सा प्रसिद्धिः केनाकारेण मातु जाग्रत्स्वप्नसुषुप्तिष्विति इन्द्रियैरर्थोपलब्धिर्जाग
रितं करणोपसंहृते तु जागरितसंस्कारजः प्रत्ययः सविषयः स्वप्नः सर्वप्रकारकतानोपसंहारो बुद्धेः कारणात्म
नावस्थानं सुषुप्तिरित्येवं लक्षिता जाग्रदाद्यवस्थाः प्रसिद्धाः तासु प्रसिद्धास्ववस्थासु संविदपि प्रसिद्धान
त्वेवं शास्त्रसंततपरिश्रममाणां संवित्प्रसिद्धिरस्तु अतिरिक्ता ना कथमिति चेदुच्यते शाङ्करीत्येण व्यवहृतत्वादि
तिसंविन्नग्रतानं चैतन्यबोधः साक्षी कूटस्थः स्वनामात्मेत्येवं प्रकारकैः शब्दैर्व्यवहृतं मसंस्कृतान्यपि देशभाषा
दिसाकेतिकशब्दैरात्मनि चैतन्यरूपे सर्वसंव्यवहारसाथ क्रियेनव्यवहरतीत्यापकं चैतेषां चेतनेन विजानामीत्या
दित्र विजानामीत्यादिव्यवहारो वायैवकदेन कस्यनुमानादिना प्रमाणेना विजानतोऽस्मिन्प्रध्यानाने ते
व द्रष्टानी तानमस्तिव्यवहारोप्यस्ति द्रष्टानीनां ते नास्तिव्यवहारोऽपि नास्तीति अन्वयव्यतिरेकत्वान्न विवेकि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नयथा चांद्रमा भगवतश्चक्षुरस्य हृदयं नेत्रमित्यादि सेषणापि ज्ञातो न दृष्टो न एव स्वप्रकाशत्वेनैव शिष्टा स्वभावेन मे उल्लाघ्याकारे
ण च एवमेव संवित्त्वतः सिद्धस्वप्रकाशत्वादिना लिंगसिद्धिकांतादिविशेषानभरविवेकेनाविज्ञातापि संवित्स्वव
हारसाधकत्वप्रधानेन विज्ञाता भवति तस्माद्विवेकविकल्पो बालं नामप्यात्मसंवित्सिद्धिरस्तीति बोध्यं स्वाव
स्थारवलेनेत्यभिप्रेत्याह उज्जृंभत इति उदयिकं यथा ज्जृंभत उल्लसति स्वावस्थारे हेतुतया प्रकाशते इत्यर्थः य
द्वा उदयि जृंभत इति हेतुः संवित्सिद्धौ विद्वत्त्वविद्वत्त्वं चाहमिति सर्वदाभानात् विद्वांसो हि वपस्स्वं इति
जानंति अविद्वांसोपि तथा किंतु प्रकाशांतरेणात एव विद्वद्विद्वद्दृष्टिः जाग्रदित्यादिरूप उज्जृंभत इत्यनेनैव पना
ग्रुपसंदर्भेण प्रज्ञानं ब्रह्मेति महावाक्यस्थप्रज्ञानशब्दस्यार्थ उक्तो भवति अधुना ब्रह्मपदस्यार्थमाह याब्र
ह्मादि पिपीलिकांततनुषु प्रोता जगत्साक्षिणीति ब्रह्मा चतुर्मुख आदिर्येषां ते ब्रह्मादयः पिपीलिका कीटविशे
षः सा अंते येषां ते पिपीलिकांताः ब्रह्मादयश्च ते पिपीलिकांताश्चेति ब्रह्मादिपिपीलिकांताः प्राणिनस्तेषां तनवः
शरीराणि तासु जगतः प्रपंचस्य साक्षिणी साक्षाद्द्रष्ट्री अव्यवधानेन दृष्ट्री त्यक्त्वा इति हेतोः प्रोता अनुगततया वर्तमाना या
प्रसिद्धा संवित् व्याख्याता एवं ब्रह्मशब्दस्य परिष्टार्थमर्थं ज्ञातेन प्रत्यगात्मन एकत्वमभिवदति सैवाहमिति

सैवाहं न च दृश्यवस्त्विति दृढप्रज्ञापि यस्यास्ति चेच्चंडालोस्तु स तु द्विजोस्तु गुरुरित्येषा मनीषा मम ॥ १ ॥

सैव प्रसिद्धैव संविदहं परं ब्रह्मैव न अहंप्रत्ययव्यवहारयोग्यस्वात्मा च दात्मनं च दृश्यवस्तु दृश्यत्वात् एव इति दृश्यं जगत्
तज्ज्ञं ज्ञानागतावत्कल्पितं कल्पितत्वेन परमार्थवस्तु निविष्टमानमप्रपंचयति जगतः कल्पितत्वेन वस्तुतो वस्तुत्वाभा
वेपि व्यवहारसत्यतांगीकारेणैव वस्तुत्वमस्तीत्यभिप्रायः तदहं न भवामि दृश्यवस्तु नो ज्ञत्वात् न परिछिन्नत्वाच्च
इति दृढप्रज्ञा दृढाभ्यासश्रवणमनननिदिध्यासनादिभिः स्थापिता प्रज्ञा मतिर्यत्तानेन देहात्मप्रत्ययवत्सा यस्य कस्यचिदपि पुरुषविशेषस्य
स्फुरणाचार्यप्रसादस्य हि स्वात्माश्रयास्ति विद्यते च यदि स तु पुरुष चंडालः पशुघातकोऽस्तु भवतु स एव हि तोज्जातावि
प्रोस्तु भवतु गुरुः सर्वेषां भगवानिति ज्ञानी त्वात्मैव मे मतमिति स्मृतेस्तत्स्वात्मतत्वरूपेण दृष्टि कामग्रहपाहिस्मृतेश्चप
मार्थ एतादृशी मम मनीषा मदीया बुद्धिर्मे मानुभवसिद्ध यावता प्रथमश्लोकेन ते वस्तु पुरुषार्थो येन जाग्रत्स्वप्नसुषुप्तिषु स्फुटत
रा या संविज्जृंभते इति पदार्था ग्रथ्येनोक्तं प्रज्ञानशब्दार्थः उक्तं यातस्वास्तु वचसा ब्रह्मादिपिपीलिकांततनुषु प्रोता जगत्सा
क्षिणी त्वयं तावद्ग्रंथेनोक्तं तत्वं ब्रह्मशब्दार्थो वा विज्ञापयति दृढ़ ज्ञानस्य फलं भजते सैवाहं न च दृश्यवस्त्विति इयता ग्रंथे

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

कर्यान्नापनयेद्व्यवहारे भेदेन यदुक्तिन्यायालम्भावनया स्वात्मनः सर्वात्मकत्वमनुभवन्क्रियया वाङ्मयं च हेतव्यवहारेयथापूर्वं यथाशास्त्रं विद्वान्वर्तितव्यमिति च लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसीति स्मृतेराचार्यस्याभिप्रायात्प्रवित्तायते ननु चंडालोऽस्तु स तु द्विजोऽस्तु गुरुरित्येषा मम मनीषेति कथमभियुक्तैर्विवेकमन्त्रितमिति चेन्न श्रात्मदृष्ट्यैव स्य चंडालत्वे यथा विद्वान् श्रष्टे पस्यापि विप्रायं श्वपचोयमित्यपि महान्को यं विभेदभ्रम इत्येवरूपत्वात् उक्तस्य वाक्यानुसारित्वात् श्रथ च परमात्मैव स्तन उपनिषदेकसमधिगम्यत्वेन वेदाधिकारित्वमेव तत्तदनुभवस्य पापि ... कर्मसु न योग्यः प्रयोगहना कर्मणाम् इति वचनात् किं च विवेकमेशोषत याचंडालदेहधारिणोपि भवेत्त्वामतस्मिन्नतिनलत्स्यात्वे नापेक्षा जन्मनैव प्राणैः कर्मणा स्वत्वात् अतः स्वर्गत्या ब्रह्मानुभवस्य सिद्धत्वात् नेतस्मिन्मम चंडालत्वादि भ्रमः न हि ज्ञानेन सदृशं पवित्रमिह विद्यते इति स्मृतेः श्रत्र पिता पिता भवति माता माता लोका श्रलोका देवा श्रदेवा वेदा श्रवेदा स्तेनोऽस्तेनो भवति भ्रूणहा भ्रूणहा चाण्डालोऽचाण्डालः इत्यादिश्रुतेश्च १ इदानीं यजुर्वेदोपनिषद्गतां अहं ब्रह्मास्मीति महावाक्यं मभिवर्णयति ब्रह्मैवाहमिति यस्य मतिः सुखतरे नित्ये परे निर्मले

ब्रह्मैवाहमिदं जगच्च सकलं चिन्मात्रविस्तारितं सर्वं चैतदविद्यया त्रिगुणयाशेषं मया कल्पितं इत्थं
यस्य दृढा मतिः सुखतरे नित्ये परे निर्मले चंडालोस्तु सः २

इदानीं तत्त्वरूपं ... चाण्डालोस्तु द्विजो वास्तु मम गुरुरित्येषा मनीषेत्यन्वयः इत्यादिविशेषणैर्विशेषिते परे किमिति मतिर्दृढेत्याकाङ्क्षायामाह ब्रह्मैवाहमित्यादि श्रहमहं शब्दप्रत्ययाभ्यामनुपलक्षित आत्मा ब्रह्मैव परिपूर्णः परमात्मैव किं च इदं सकलं समस्तं जगत् चेतनाचेतनात्मकं चिन्मात्रः विस्तारितं चिन्मात्रेण चिदेकरसेन ब्रह्मणा विस्तारिते प्रपंचिते केन विस्तारितमित्याशंकायामाह सर्वं चैतदविद्ययेति एतत्परिदृश्यमानमब्रह्मादौ स्वदेहसहितं सर्वं जगत् त्रिगुणया त्रिगुणात्मिकया अविद्यया मायापि ... शेषेण कल्पितं रचितं दृश्यमेवं प्रकारेण निश्चित्येति शाप: ... भावनादिभिर्निर्बाधितेत्यर्थः यस्यापि यस्य वाक्यसाक्षिस्वरूपे स्वे ... क्षि विद्यते चेत् स्वनेन ज्ञाननिष्ठाया उत्तमत्वं सत चंडालोस्तित्यादि सर्वं पूर्ववत् २ अधुना साममहावाक्योप

शेष

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

त्सर्वदा नष्टरमेव नन्तु नित्यमिति नित्यं सर्वदा विमृश्यता मालोच्यता अतएव नि बीज शान्तात्मना निष्क
पटः शान्तः उपरतः आत्मा तः करणं यस्य तेन भूतमतीतं भाव्यागामि च करणेन वर्तमानं च यदुःखानुभवका
रणं पापं सविन्मयेन स्वे ब्रह्मसि ज्योतिताननरूपपावके अनेनाप्यदहतो प्रक्षेपाद्दहन कृतवेताय नशु रू
षयो वेद्यो नावत्तविन्मयेनेति यावत् स्वस्वकीयं वपुः शरीरं प्राणापाय अवशेषं भाविफलाय कर्म
णो समर्पितं सम्यगर्पितं प्रारब्धाधीनं कालेवरं हात ततस्य जीवतो मरणोवान स्वयं ब्रह्म शक्रियत इति भा
वः सन्तं च ज्ञात्वा सत्त्वद्विजोवा सन्तगुरुं विप्रतदनुबंगतवांछि स्मरणमाशयम २ सम्प्रत्ययमात्मा ब्रह्मेत्य
थर्वणशाखोपनिषद्गतमहावाक्यस्यार्थमाह यातीर्यमिति तत्रतावदयमात्मा ब्रह्मेति वाक्यस्य ब्रह्म
शब्दार्थमाह यातिर्थेति याप्रसिद्धा स्फुरणं चैत्यमिति यावत् तिर्यग् इदे वताभिः तिर्यग्भिः पशुभि
नरैर्मनुष्यैः देवताभिर्देवैश्च अहमित्यन्तः प्रत्ययत्ववशात् योग्यतं सर्वविनीतमथ शाहवाख्यायात्वथो स्फुर
मनात्तवर्णयपानवानस्तते अनुभूयते किं च यद्वासा यस्याः स्फुर्तेर्भासा प्रकाशेन हृदयादा देहाद्वि
शम्यत्र स्परमेव विश्वमखिलं निम्बि सर्वाचर गुरो नित्यं ब्रह्मैतिरेतं वेविमृश्यतानिर्बीज शान्तात्मना
भूतं भावि च दुष्कृतं प्रदहता संविन्मये पावके प्रारब्धाय समर्पितं स्ववपुः इत्येषा मनीषा मम २
यातिर्यङ् नर देवताभिरहमित्यन्तः स्फुटा गृह्यते यद्भासा हृदयाक्ष देहविषया भाति स्वतोऽचेतनाः
तां भास्यैः पिहितार्कमण्डलनिभां स्फूर्तिं सदा भावयन् योगी निर्वृतमानसो हि गुरुरित्येषा मनीषा मम ४
वपाः हृदयं हृद्विहृत्कमलके अपनमस्पति हृदयं मनः अत्ताणि इन्द्रियाणि तानक्रमाद्वानि देहः स्थूलो वि
षयाः शब्दाद्याः वंचनाया अस्मतेस्वैव सतः स्वभावतः अचेतनाजडा अप्येते पि प्रकाशत्वं प्राप्य भाति प्रका
शन्ते चेतनास्त वस्पर्शः उत भौस्स प्रकाशेन हृदयादेह विषयैः पिहितार्कमण्डलनिभांपिहितमाच्छादितमेघै
र्वार्कमण्डलं सूर्यमण्डलं तन्निभां तत्सदृशी स्फूर्तिं व्याप्तां सदा नित्यं योगी निर्जितेन्द्रियो भावयन्नहमिति ध्या
यन्निति अत्र शब्दार्थो व्याख्यातः यत् स्फूर्तिर्तिर्यङ् नर देवताभिरहमित्यन्तः स्फुरणं स्फुरति ब्रह्मणो रूपमनु
यद्भासा हृदयाद्देहविषया भाति स्वतोऽचेतनाः इत्यनेनापि रूपमनुक्तं तां भास्यैः पिहितार्कमण्डलनिभां स्फूर्तिं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

५ 5

एवं महावाक्यचतुष्टयस्य जीवब्रह्मैक्यपरत्वमभिवर्ण्य तन्निष्ठस्य गुरुत्वमपि व्याख्यायाधुना फलितमाह यत्सौख्या
म्बुधीति यस्य सिद्धविद्वत्तमसौख्यमखण्डस्याम्बुधिः समुद्र इव समुद्रः अपर्यन्तत्वात् एतस्यैवानन्दस्यान्यानि भूतानि मात्राम्
उपजीवन्तीति श्रुतेः तस्य सौख्याम्बुधेर्लेशालेशतः सूक्ष्मात्सूक्ष्मतमात् लेशमात्रादित्यर्थः इमे प्रसिद्धाः शक्रादयः इन्द्राद
यः ब्रह्महरपर्यन्तप्रभृतयः आदिशब्देनोच्यन्ते निर्वृतास्तृप्ता आनन्दिनो जाता इत्यर्थः यत्सुखं चित्ते अन्तःकरणे नित
रामत्यन्तं प्रशान्तकलने कलनं चलनं यस्मिन् तत्तथा तस्मिन्सति लब्ध्वा प्राप्य अपरोक्षतया अहमित्यनुभूयेत्यर्थः
मुनिर्मननशीलो निर्वृतो मुक्तो भवतीत्यर्थः यस्मिन्योगिप्रत्यक्षगम्ये प्रसिद्धे नित्यसुखाम्बुधौ सुखमेवा
म्बुधिः सुखाम्बुधिः नित्यश्चासौ सुखाम्बुधिश्चेति नित्यसुखाम्बुधिः सुखस्याविषयजनितस्य हेत्वधीनतया क्षणि

यत्सौख्याम्बुधिलेशलेशत इमे शक्रादयो निर्वृता यच्चित्ते नितरां प्रशान्तकलने लब्ध्वा मुनिर्निर्वृतः ।
यस्मिन्नित्यसुखाम्बुधौ गलितधीर्ब्रह्मैव न ब्रह्मवित् यः कश्चित्स सुरेन्द्रवन्दितपदो नूनं मनीषा मम ॥

५

कत्वेऽपि अविषयजनितस्य हेत्वधीनताभावान्नित्यत्वमत एवापरिच्छिन्नत्वं चेति विज्ञेयं तत्र तस्मिन्नित्यसुखा
म्बुधौ गलिता अस्ता विलीनेत्यर्थः धीर्बुद्धिर्ब्रह्माकारवृत्तिरिति यावत् यस्य स तथा अतएव ब्रह्मस्वरूप एव न
ब्रह्मवित् ब्रह्म वेत्तीति ब्रह्मवित् स न भवति ह्येतद्रूपस्य ज्ञानस्य हेत्वधीनं हि वेद्यत्वं वेदितृत्वं च य एतादृशः क
श्चित् इत्यनेन ब्रह्मविन्नित्यनिर्विकल्पसमाधिवान् लोके दुर्लभतर इति गम्यते सर्वैः सेन्द्रो ब्रह्मविष्णुहरैः
सुरेन्द्रवन्दितपदः सुरा देवास्तेषामिन्द्रः स्वामी शक्रस्तेन वन्दितं नमस्कृतं पदं पादो यस्य स तथा अन्ते
न मतं अस्मिन्नर्थे न संशयः एवं मम मनीषेति स्पष्टं मनीषापञ्चकस्यैवं कृता टीका मनोहरा बालगो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative